॥ श्री ॥

# युक्त्यनुशासन

आ. समन्तभद्र · संस्कृतम् · ६४ पद्य · ~१० मिनट

कीर्त्या महत्या भुवि वर्द्धमानं
त्वां वर्द्धमानं स्तुतिगोचरत्वम् ।
निनीष्व: स्मो वयमद्य वीरं
विशीर्ण-दोषाऽऽशय-पाश-बंधनम् ॥1॥

याथात्म्यमुल्लंघ्य गुणोदयाऽऽख्या
लोके स्तुतिर्भूरि गुणोदधेस्ते ।
अणिष्ठमप्यंशमशक्नुवंतो
वक्तुं जिन ! त्वां किमिव स्तुयाम ॥2॥

तथाऽपि वैय्मात्यमुपेप्य भक्त्या
स्तोताऽस्मि ते शक्त्यनुरूपवाक्यः ।
इष्टे प्रमेयेऽपि यथास्वशक्ति
किंनोत्सहंते पुरुषा: क्रियाभि: ॥3॥

त्वं शुद्धि-शक्त्योरुदस्य काष्ठां
तुला-व्यतीतां जिन ! शांतिरूपाम् ।
अवापिथ ब्रह्म-पथस्य नेता
महानिनीयत् प्रतिवक्तुमीशा: ॥4॥

कालः कलिर्वा कलुषाऽऽशयो वा
श्रोतुः प्रवक्तुर्वचनाऽनयो वा ।
त्वच्छासनैकाधिपतित्व-लक्ष्मी-
प्रभुत्व-शक्तेरपवाद-हेतुः ॥5॥

दया-दम-त्याग-समाधि-निष्ठं
नय-प्रमाण-प्रकृताऽऽञ्जसार्थम् ।
अधृष्यमन्यैरखिलैः प्रवादै-
र्जिन ! त्वदीयं मतमद्वितीयम् ॥6॥

अभेद-भेदात्मकमर्थतत्त्वं
तव स्वतंत्राऽंयतरख-पुष्पम् ।
अवृत्तिमत्त्वात्समवाय-वृत्तेः
संसर्गहानेः सकलाऽर्थ-हानिः ॥7॥

भावेषु नित्येषु विकारहानेः
न कारकव्यापृति-कार्य-युक्तिः ।
न बन्धभोगौ न च तद्विमोक्षः
समन्तदोषं मतमन्यदीयम् ॥8॥

अहेतुकत्वं-प्रथितः स्वभाव-
स्तस्मिन् क्रियाकारकविभ्रमः स्यात् ।
आबालसिद्धेर्विविधार्थसिद्धि-
र्वादान्तरं किं तदसूयतां ते ॥9॥

येषामवक्तव्यमिहात्मतत्त्व
देहादनन्यत्वपृथसम्यक्त्वकक्लृप्ते: ।
तेषां ज्ञातत्त्वेऽनवधार्यतत्त्वे
का बंधमोक्षस्थितिरप्रमेये ॥10॥

हेतुर्न दृष्टोऽत्र न चाऽप्यदृष्टो
योऽयं प्रवाद: क्षणिकात्मवाद: ।
न ध्वस्तमन्यत्र भवे द्वितीये
संतानभिंने न हि वासनाऽस्ति ॥11॥

तथा न तत्कारण-कार्य-भावो
निरवन्या: केन समानरूपा: ।
असत्खपुष्पं न हि हेत्वपेक्षं
दृष्टं न सिद्ध्यत्युभयोरसिद्धम् ॥12॥

नैवाऽस्ति हेतु: क्षणिकात्मवादे
न सन्नसन्वा विभवादकस्मात् ।
नाशोदयैकक्षणता च दृष्टा संतान-
भिन्न-क्षणयोरभावात् ॥13॥

कृत-प्रणाशाऽकृत कर्मभोगौ
स्यातामसञ्चेतितकर्म च स्यात् ।
आकस्मिकेऽर्थे प्रलय स्वभावे
मार्गो न युक्तो वधकश्च न स्यात् ॥14॥

न बंध-मोक्षौ क्षणिकैक-सस्थौ

न संवृतिः साऽपि मृषा-स्वभावा ।

मुख्यादृते गौण-विधिर्न दृष्टो

विभ्रांत-दृष्टिस्तव दृष्टितोऽन्या ॥15॥

प्रतिक्षणं भङ्गिषु तत्पृथक्त्वा-

न्न मातृघाती स्व-पतिः स्व-जाया ।

दत्त-ग्रहो नाऽधिगत-स्मृतिर्न न

क्त्वार्थ-सत्यं न कुलं न जातिः ॥16॥

न शास्तृशिष्यादिविधिव्यवस्था,

विकल्पबुद्धिर्वितथाऽखिला चेत् ।

अतत्त्वतत्त्वादिविकल्पमोहे,

निमज्जतां वीतविकल्पधीः का ? ॥17॥

अनर्थिका साधनसाध्यधीश्चेद्,

विज्ञानमात्रस्य न हेतुसिद्धिः ।

अथार्थवत्त्वं व्यभिचारदोषो,

न योगिगम्यं परवादिसिद्धम् ॥18॥

तत्त्वं विशुद्धं सकलैर्विकल्पै-

र्विश्वाऽभिलाखापाऽऽस्पदतामतीतम् ।

न स्वस्य वेद्यं न च तन्निगद्यं

सुषुप्त्यवस्थं भवदुक्तिबाह्यम् ॥19॥

मूकात्म-संवेद्यवदात्मवेद्यं-

तन्म्लिष्ट-भाषा-प्रतिम-प्रलापम् ।

अनङ्ग-संज्ञं तदवेद्यमन्यैः

स्यात्त्वद्द्विषां वाच्यमवाच्यतत्त्वम् ॥20॥

अशासदङ्गांसि वचांसि शास्ता

शिष्याश्च शिष्टा वचनैर्न ते तैः ।

अहो इदं दुर्गतमं तमोऽन्यत्

त्वयाविना श्रायसमार्य ! किं तत् ॥21॥

प्रत्यक्षबुद्धिः क्रमते न यत्र

तल्लिंग-गम्यं न तदर्थ-लिंगम् ।

वाचो न वा तद्विषयेण योगः का तद्गतिः ?

कष्टमशृण्वतां ते ॥22॥

रागाद्यविद्याऽनल-दीपनं च

विमोक्ष-विद्याऽमृत-शासनं च ।

न भिद्यते संवृति-वादि-वाक्यं

भवत्प्रतीपं परमार्थ शून्यम् ॥23॥

विद्याप्रसूत्यैकिल शील्यमाना

भवत्यविद्या गुरुणोपदिष्टा ।

अहो त्वदोयोक्त्यनभिज्ञमोहो,

यंजन्मने यत्तदजन्मने तत् ॥24॥

अभावमात्रं परमार्थवृत्तेः
सा संवृतिः सर्व विशेषशून्य ।
तस्या विशेषौ किल बंधमोक्षौ
हेत्वामनेति त्वदनाथवाक्यम् ॥25॥

व्यतीत-सामान्य-विशेष-भावाद्
विश्वाऽभिलापाऽर्थ-विकल्प-शून्यम् ।
ख पुष्पवत्स्वादसदेव तत्त्वं
प्रबुद्धतत्त्वाद्भवतः परेषाम् ॥26॥

अतत्स्वभावेऽप्यनयोरुपायाद्-
गतिर्भवेत्तौ वचनीय-गम्यौ ।
संबंधिनौ चेन्न विरोधि दृष्टं
वाच्यं यथार्थं न च दूषणं तत् ॥27॥

उपेयतत्त्वाऽनभिलाप्यताव,
दुपायतत्त्वाऽनभिलाप्यता स्यात् ।
अशेषतत्त्वाऽनभिलाप्यतायां,
द्विषां भवद्युक्त्यभिलाप्यतायाः ॥28॥

अवाच्यमित्यत्र च वाच्यभावा-
दवाच्यमेवेत्ययथाप्रतिज्ञम् ।
स्वरूपतश्चेत्पररूपवाचि
स्व-रूपवाचीति वचो विरुद्धम् ॥29॥

सत्याऽनृतं वाऽप्यनृताऽनृतं

वाऽप्यस्तीह किं वस्त्वतिशायनेन ।

युक्तं प्रतिद्वन्द्वय्नुबंधि-मिश्रं

न वस्तु तादृक् त्वदृते जिनेदृक् ॥30॥

सहक्रमाद्वा विषयाऽल्प-भूरि-

भेदेऽनृतं भेदि न चाऽऽत्मभेदात् ।

आत्मांतरं स्याद्भिदुरं समं च

स्याच्याऽनृतात्माऽनभिलाप्यता च ॥31॥

न सच्च नाऽसच्च न दृष्टमेक-

मात्मांतरं सर्व-निषेध-गम्यम् ।

दृष्टं विमिश्रं तदुपाधि-भेदात्

स्वप्नेऽपिनैतत्त्वदृषे: परेषाम् ॥32॥

प्रत्यक्ष-निर्देशवदप्यसिद्धम्-

ऽकल्पकं ज्ञापयितुं ह्यशक्यम् ।

विना च सिद्धेर्न च लक्षणार्थो

न तावकद्वेषिणि वीर ! सत्यम् ॥33॥

कालांतरस्थे क्षणिके ध्रुवे वा-

ऽपृथक्पृथक्त्वाऽवचनीयतायाम् ।

विकारहानेर्न च कर्तृ कार्ये

वृथा श्रमोऽयं जिन ! विद्विषां ते ॥34॥

मद्याङ्गवद्भूत-समागमे ज्ञः

शक्त्यंतर-व्यक्तिरदैव-सृष्टिः ।

इत्यात्म-शिश्नोदर-पुष्टि-तुष्टै-

र्निर्ह्रीभयैर्हा ! मृदवः प्रलब्धाः ॥35॥

दृष्टेऽविशिष्टे जननादि हेतौ

विशिष्टता का प्रतिसत्त्वमेषाम् ।

स्वभावतः किं न परस्य सिद्धि

रतावकानामपि हा ! प्रपातः ॥36॥

स्वच्छंदवृत्तेर्जगतः स्वभावात्-

उच्चैरनाचारपथेष्वदोषम् ।

निर्घुष्य दीक्षासममुक्तिमाना-

स्त्वद्दृष्टि बाह्या बत ! विभ्रमंति ॥37॥

प्रवृत्तिरक्तैः शमतुष्टिरिक्तै-

रूपेत्य हिंसाऽभ्युदयाङ्गनिष्ठा ।

प्रवृत्तितः शांतिरपि प्ररूढं

तमः परेषां तव सुप्रभातम् ॥38॥

शीर्षोपहारादि भिरात्मदुःखै-

र्देवान्किलाऽऽराध्य सुखाभिगृद्धाः ।

सिद्ध्यंति दोषाऽपचयाऽनपेक्षा-

युक्तं च तेषां त्वमृषिर्न येषाम् ॥39॥

सामान्यनिष्ठा विविधा विशेषा

पदं विशेषांतर पक्षपाति ।

अंतर्विशेषांतर वृंत्तितोऽन्यत्

समानभावं नयते विशेषम् ॥40॥

यदेवकारोपहितं पदं तद्-

अस्वार्थतः स्वार्थमवच्छिनत्ति ।

पर्यायसामान्यविशेष सर्वं

पदार्थहानिश्च विरोधिवत्स्यात् ॥41॥

अनुक्ततुल्यं यदनेवकारं

व्यावृत्यभावान्नियमद्वयेऽपि ।

पर्यायभावेऽन्यतरप्रयोग-

स्तत्सर्वमन्यच्युतमात्महीनम् ॥42॥

विरोधि चाऽभेद्यविशेषभावात्-

तद्द्योतनः स्याद्गुणतो निपातः ।

विपाद्यसंधिश्च तथाऽङ्गभावा-

दवाच्यता श्रायसलोपहेतुः ॥43॥

तथा प्रतिज्ञाऽऽशयतोऽप्रयोगः

सामर्थ्यतो वा प्रतिषेधयुक्तिः ।

इति त्वदीया जिननाग ! दृष्टिः

पराऽप्रधृष्या परधर्षिणी च ॥44॥

विधिर्निषेधोऽनभिलाप्यता च
त्रिरेकशस्त्रिर्द्विश एक एव ।
त्रयो विकल्पास्तव सप्तधाऽमी
स्याच्छब्दनेया: सकलेऽर्थभेदे ॥45॥

स्यादित्यपि स्याद्गुणमुख्यकल्पै-
कांतोयथोपाधिविशेषवीक्ष्य: ।
तत्त्वं त्वनेकांतमशेष रूपं
द्विधा भवार्थव्यवहारवत्त्वात् ॥46॥

न द्रव्यपर्याय पृथग्व्यवस्था
द्वैयात्म्यमेकाऽर्पणया विरुद्धम् ।
धर्मी च धर्मश्च मिथस्त्रिधेमौ
न सर्वथा तेऽभिमतौ विरुद्धो ॥47॥

दृष्टाऽऽगमाभ्यामविरुद्धमर्थ-
प्ररूपणं युक्त्यनुशासनं ते ।
प्रतिक्षणं स्थित्युदयव्ययात्म-
तत्त्वव्यवस्थं सदिहाऽर्थरूपम् ॥48॥

नानात्मतामप्रजहत्तदेक-
मेकात्मतामप्रजहच्च नाना ।
अङ्गांङ्गिभावात्तव वस्तु तद्यत्
क्रमेण वाग्वाच्यमनन्तरूपम् ॥49॥

मिथोऽनपेक्षाः पुरुषार्थहेतु-

र्नांशा न चांशी पृथगस्ति तेभ्यः ।

परस्परेक्षाः पुरुषार्थहेतु-

र्दृष्टा नयास्तद्वदसिक्रियायाम् ॥50॥

एकांतधर्माऽभिनिवेश मूला-

रागादयोऽहंकृतिजा जनानाम् ।

एकांत हानाच्च स यत्तदेव

स्वाभाविकत्वाच्च समं मनस्ते ॥51॥

प्रमुच्यते च प्रतिपक्षदूषी

जिनः त्वदीयैः पटुसिंहनादैः ।

एकस्य नानात्मतया ज्ञवृत्ते-

स्तौ बंधमोक्षौ स्वमतादबाह्यौ ॥52॥

आत्मान्तराऽभावसमानता न

वागास्पदं स्वाऽऽश्रयभेदहीना ।

भावस्य सामान्यविशेषवत्त्वा-

दैक्ये तयोरन्यतरन्निरात्म ॥53॥

अमेयमश्लिष्टममेयमेव

भेदेऽपि तद्वृत्त्यपवृत्तिभावात् ।

वृत्तिश्च कृत्स्नांश विकल्पतो न

मानं च नाऽनन्तसमाश्रयस्य ॥54॥

नाना सदेकात्मसमाश्रयं चेद्-

ऽन्यत्वमद्धिष्ठमनात्मनोः क्व ।

विकल्पशून्यत्वमवस्तुनश्चेत्

तस्मिन्नमेये क्व खलु प्रमाणम् ॥55॥

व्यावृत्तिहीनान्वयतो न सिद्ध्येद्,

विपर्ययेऽप्यद्वितयेऽपि साध्यम् ।

अतद्व्युदासाभिनिवेशवादः,

पराभ्युपेतार्थविरोधवादः ॥56॥

अनात्मनाऽनात्मगतेरयुक्ति-

र्वस्तुन्ययुक्तेर्यदि पक्षसिद्धिः ।

अवस्त्वयुक्तेः प्रतिपक्षसिद्धिः,

न च स्वयं साधनरिक्तसिद्धिः ॥57॥

निशायितस्तैः परशुः परघ्नः,

स्वमूर्ध्नि निर्भेदभयाऽनभिज्ञैः ।

वैतण्डिकैर्यैः कुसृतिः प्रणीता,

मुने! भवच्छासनदृक्प्रमूढैः ॥58॥

भवत्यभावोपि च वस्तुधर्मो

भावांतरं भाववदर्हतस्ते ।

प्रमीयते च व्यपदिश्यते च

वस्तुव्यवस्थांगममेयमन्यत् ॥59॥

विशेषसामान्यविषक्तभेद-
विधिव्यवच्छेदविधायि वाक्यम् ।
अभेदबुद्धेरविशिष्टता स्याद्
व्यावृतिबुद्धेश्च विशिष्टता ते ॥60॥

सर्वान्तवत्तद्गुणमुख्यकल्पं
सर्वान्तशून्यं च मिथोऽनपेक्षम् ।
सर्वापदामन्तकरं निरन्तं
सर्वोदयं तीर्थमिदं तवैव ॥61॥

कामं द्विषन्नप्युपपत्तिचक्षुः
समीक्ष्यतां ते समदृष्टिरिष्टम् ।
त्वयि ध्रुवं खण्डित मानशृङ्गो,
भवत्यभद्रोपि समंतभद्रः ॥62॥

न रागान्नः स्तोत्रं भवति भवपाशच्छिदि मुनौ,
न चान्येषु द्वेषादपगुणकथाभ्यासखलता ।
किमु न्यायान्यायप्रकृतगुणदोषज्ञ मनसां
हितान्वेषोपायस्तव गुणकथासङ्गगदितः ॥63॥

इति स्तुत्यः स्तुत्यैस्त्रिदशमुनिमुख्यैः प्रणिहितैः,
स्तुतः शक्त्या श्रेयः पदमधिगतस्त्वं जिन ! मया ।
महावीरो वीरो दुरितपरसेनाऽभिविजये
विधेया मे भक्तिं पथि भवत एवाप्रतिनिधौ ॥64॥

**पाठ-स्रोत:** मूल गाथाएँ जैन गाथा डेटाबेस (टंकण-श्रेय: Nikky Jain, nikkyjain.github.io) से — केवल प्राचीन मूल पाठ लिया गया है; अनुवाद/अन्वयार्थ सम्मिलित नहीं · मूल पाठ प्राचीन एवं public domain; टंकण-श्रेय यथोक्त · मूल e-text ↗
यह मूल पाठ है — अर्थ/टीका सम्मिलित नहीं। अशुद्धि दिखे तो GitHub पर shastra/yuktyanushaasana.md सुधारें।